वियोज्य / *DETACHABLE*

# SANSKRIT

## Paper II

## (LITERATURE)

*Time Allowed : Three Hours* | *Maximum Marks : 250*

### QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions.**

There are EIGHT questions divided into two SECTIONS.

Candidate has to attempt FIVE questions in all.

Question No. 1 and **5** are compulsory and out of the remaining, THREE are to be attempted choosing at least ONE from each section.

The number of marks carried by a question/part is indicated against it.

Question No. 4, 5 and 6 must be answered in SANSKRIT and the remaining questions must be answered either in SANSKRIT or in the medium authorized in the Admission certificate. Answers written in SANSKRIT must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Any page or portion of the page left blank in the answer book must be clearly struck off.

Attempts of questions shall be counted in chronological order. Unless struck off, attempt of a question shall be counted even if attempted partly.

## SECTION 'A'

**1.** अधोनिर्दिष्टानां विषयाणां पर्यालोचनं सोदाहरणं विधीयताम् । 10×5=50

**1.(a)** रघुवंशे कालिदासेनाविष्कृतं जीवनदर्शनम् ।

**1.(b)** किरातार्जुनीये वीररसः ।

**1.(c)** नैषधीयचरिते श्रीहर्षकवेः दर्शनशास्त्रवैदुष्यम् ।

**1.(d)** कादम्बरीरसज्ञानामाहारोऽपि न रोचते ।

**1.(e)** दशकुमारचरिते तात्कालिकस्य समाजस्य ज्वलन्तचित्रणम् ।

**2.** अधोनिर्दिष्टानां विषयाणां समीक्षा विधेया । 17+17+16=50

**2.(a)** ईशावास्योपनिषदि ज्ञान-कर्मसमन्वयः ।

**2.(b)** भगवद्गीतायां प्रतिपादितं आत्म-प्रबन्धनम् ।

**2.(c)** चतस्र एव विद्या इति कौटिल्यः ।

3. अधस्तनयोः विषययोः सारपरिपूर्णा समीक्षा कार्या । 25×2=50

3.(a) कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् ।

3.(b) शास्त्रीयपद्धतिमाश्रित्य विरचितेषु दृश्यकाव्येषु 'रत्नावली'नाम दृश्यकाव्यमेकं श्रेष्ठं दृश्यकाव्यम् ।

4. अधस्तनेषु विषयेषु नागराक्षरैः संस्कृतभाषायामेव विवेचनं विधेयम् । 17+17+16=50

4.(a) मेघदूतं प्रकृतेरनुपमा रङ्गशालेव भाति ।

4.(b) हर्षचरितं सप्तशतकवर्तिनो भारतस्य अत्युज्ज्वलं प्रामाणिकं सांस्कृतिकं चित्रं प्रस्तौति ।

4.(c) गीतगोविन्दस्य रचनाकौशलम् ।

## SECTION 'B'

5. नागराक्षरैः संस्कृतभाषायां व्याख्यायन्ताम् । 10×5=50

5.(a) वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

5.(b) अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।।

5.(c) अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसंनिपाते निमज्जतीन्दोः किरणेष्विवाङ्कः ।

5.(d) कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।।

5.(e) स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ।।

6. अधोनिर्दिष्टानां व्याख्या नागराक्षरैः संस्कृतभाषायां कार्या । 17+17+16=50

6.(a) ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद् धनम् ।।

6.(b) नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।।

6.(c) सुखार्हां दुःखसंतप्तां व्यसनानामकोविदाम् ।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम् ।।

7. अधोलिखितानामाशयं ससन्दर्भं प्रतिपाद्यताम् । 17+17+16=50

7.(a) आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि ।।

7.(b) विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ।।

7.(c) गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलं स्नानम्, अनुपजातपलितादिवैरुप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरुकरणम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः प्रजागरः । विशेषेण राज्ञाम् । विरला हि तेषामुपदेष्टारः ।

8. अधोलिखितानां पद्यानां प्रसङ्गनिर्देशपूर्वकं व्याख्या कार्या । 17+17+16=50

8.(a) कातरा येप्यशक्ता वा नोत्साहस्तेषु जायते ।
प्रायेण हि नरेन्द्रश्रीः सोत्साहैरेव भुज्यते ।।

8.(b) भूत्वा चिराय चतुरन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं निवेश्य ।
भर्त्रा तदर्पितकुटुम्बभरेण सार्धं
शान्ते करिष्यासि पदं पुनराश्रमेऽस्मिन् ।।

8.(c) अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ।।